## नित्यं मन्त्रे। (२१०/३६९८)

जुष्ट अर्पित इत्येते शब्दरूपे मन्त्रविषये नित्यमाद्युदात्ते भवतः। जुष्ट[1] देवानाम्। अर्पितं पितॄणाम्। पूर्वेणात्र विकल्पः प्राप्तः। केचिदत्र जुष्ट इत्येतदेवानुवर्तयन्ति। अर्पितशब्दस्य विभाषा मन्त्रेऽपीच्छन्ति। अन्तोदात्तोऽपि ह्ययं मन्त्रे पठ्यते, '[1]तस्मिन् साकं त्रिशता न शङ्कवोऽर्पिताः' (ऋ. १.१६४.४८) इति॥

## युष्मदस्मदोर्ङसि। (२११/३६९९)

युष्मदस्मदी मविक्प्रत्ययान्तेऽन्तोदात्ते, तयोर्ङसि परतः आदिः उदात्तो भवति। तव स्वम्। मम स्वम्॥

## ङयि च। (२१२/३७००)

युष्मदस्मदोः इति वर्तते, आदिरुदात्तः इति च। ङे इत्येतस्मिंश्च परतो युष्मदस्मदोः आदिरुदात्तो भवति। 'तुभ्यम्' (तै. सं. १.३.१४.३)। मह्यम्। पृथग्योगकरणं यथासङ्ख्यशङ्कानिवृत्त्यर्थम्॥

## यतोऽनावः। (२१३/३७०१)

'निष्ठा च द्व्यजनात्' (६.१.२०५/३६९३) इत्यतो द्व्यज्ग्रहणमनुवर्तते। यत्प्रत्ययान्तस्य द्व्यच आदिरुदात्तो भवति न चेन् नौशब्दात् परो भवति। 'अचो यत्' (३.१.९७/२८४२) – चेयम्। जेयम्। 'शरीरावयवाद् यत्' (५.१.६/६६६) – कण्ठ्यम्। ओष्ठ्यम्। 'तित्स्वरितम्' (६.१.१८५/३७२९) [2]इत्यस्यापवादः। अनावः इति किम्? नाव्यम्। द्व्यचः इत्येव, चिकीर्ष्यम्[3]। ललाट्यम्॥

## ईडवन्दवृशंसदुहां ण्यतः। (२१४/३७०२)

ईड वन्द वृ शंस दुह इत्येतेषां यो ण्यत् [4]तदन्तस्य आदिरुदात्तो भवति। ईड्यम्। वन्द्यम्। वार्यम्। शंस्यम्। दोह्या धेनुः। द्व्यनुबन्धकत्वात् ण्यतो यद्ग्रहणेन ग्रहणं नास्ति इति 'तित्स्वरितम्' (६.१.१८५/३७२९) इत्येतत् प्राप्तम्। वार्यम् इति 'वृङ सम्भक्तौ' (धा. पा. १५१०) इत्यस्यायं ण्यत्। क्यब्विधौ हि[5] वृञ एव ग्रहणमिष्यते॥

## विभाषा वेण्विन्धानयोः। (२१५/३७०३)

वेणु इन्धान इत्येतयोः विभाषा आदिरुदात्तो भवति। वेणुः, वेणुः। इन्धानः, इन्धानः, इन्धानः। वेणुशब्दोऽयम् 'अजिवृरीभ्यो निच्च' (उ. ३२५) इति णुप्रत्ययान्तो नित्वान्नित्यमाद्युदात्तः [6]प्राप्तः। इन्धानशब्दोऽपि यदा चानशन्तस्तदा चित्त्वादन्तोदात्तः। अथ शानजन्तस्तदा [7]लसार्वधातुकानुदात्तत्वे कृते उदात्तनिवृत्तिस्वरेण मध्योदात्तः। तदेवमिन्धाने[8] सर्वथा अप्राप्तमुदात्तत्वं पक्षे विधीयते। वेणुरिव वेणुः इत्युपमानं यदा सञ्ज्ञा भवति,[9] तदा 'सञ्ज्ञायामुपमानम्' (६.१.२०४/३६९२) इति [10]नित्यमाद्युदात्तत्वमिष्यते॥

---

1. तस्मिन् नास्ति फ. 2. तस्यापवादः ह. 3. जिहीर्ष्यम् इत्यधिकम् क. 4. तस्य क. 5. वृङः एव ग्रहणमिष्यते न वृञः ह. फ, वृङः ड. 6. प्राप्तः नास्ति फ. 7. ल नास्ति ह. 8. शब्दे इत्यधिकम् फ. 9. इति इत्यधिकम् ह. 10. नित्यम् नास्ति फ.